CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिवचरित

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



श्रीगणेशायनमः॥ श्रीसांबसदाशिवायनमः॥ ऋषभउवाच॥
नमस्कृत्वामहादेवंविश्वव्यापिनमीश्वरं॥ वक्ष्येशिवमयंवर्मस
र्वरक्षाकरंनृणां॥१॥ शुचौदेशेसमासीनोयथावत्कल्पितासऽ
नः॥ जितेंद्रियोजितःप्राणःश्चिंतयेच्छिवमव्ययं॥२॥ हृत्पुं
डरीकांतरसंनिविष्टंस्वतेजसाव्याप्तनभोवकाशं॥ अतींद्रियं
सूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहेशं॥३॥ ध्यानावधू
ताखिलकर्मबंधश्चिरंचिदानंदनिमग्नचेताः॥ षडक्षरंन्या
ससमाहितात्माशैवेनकुर्यात्कवचेनरक्षां॥४॥ मांपातुदे
वोखिलदेवतात्मासंसारकूपेपतितंगभीरे॥ तंनाममिव्येव

कवच

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

रमंत्रमूलंधुनोतुमेसर्वमघंहृदिस्थं॥५॥सर्वत्रमांरक्षतु
विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा॥अणोरणीयांनुरु
शक्तिरेकःसर्श्वरःपातुभयादशेषात्॥६॥योंऽतस्तत्वेऽण्ड मूंः
बिभर्तिविश्वंपायात्सभूमेर्गिरिशोऽष्टमूर्तिः॥योपांत्वस्तत्वे
णनृणांकरोतिसंजीवनंसोवतुमांजलेभ्यः॥७॥कृत्स्नावसा
नेभुवनानिदग्ध्वासर्वाणियोनृत्यतिभूरिलीलः॥सकालरु
द्रोवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात्॥८॥
प्रदीप्तविद्युत्कनकावभासोविद्यावराभीतिकुठारपाणिः॥
॥चतुर्मुखःपातुसुरोषसृष्टिनेत्रःप्राच्यांस्थितोरक्षतुमाम

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



जस्रं ॥ १ ॥ कुठारवेदांकुशपाशशूलकपालडक्काक्ष
गुणांदधानः ॥ चतुर्मुखोनीललचित्रिनेत्रः पायाद्दो
रोदिशिदक्षिणस्यां ॥ १० ॥ कुंदेंदुशंखस्फटिकावभासोवे
दाक्षमालावरदाभयांकः ॥ त्र्यक्षश्चतुर्वक्त्रउरुप्रभावः
सदोधिजातोवतुमांप्रतीच्यां ॥ ११ ॥ वराक्षमालाभयटं
कहस्तः सरोजकिंजल्कसमानवर्णः ॥ त्रिलोचनश्चारु
चतुर्मुखोमांपायादुदीच्यांदिशिवामदेवः ॥ १२ ॥ वेदाभ
येष्टांकुशपाशशूलकपालडक्काक्षत्रिशूलपाणिः ॥
सितद्युतिः पंचमुखोवलान्मामीशानमूर्ध्वंपरमप्रकाशः ॥
॥ १३ ॥ मूर्धानमव्यान्ममचंद्रमौलिर्भालंममाव्यादथभाल

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

नेत्रः ॥ नेत्रेममाव्याद्भ्रुगनेत्रहारीनासांसदारक्षतुविश्वनाथः ॥१४॥
पायाद्भ्रुतीमेश्रुतिगितकीर्तिःकपोलमव्यात्सततंकपाली ॥वक्त्रंस
दारक्षतुपंचवक्त्रोजिह्वांसदारक्षतुवेदजिह्वः ॥ १५ ॥ कंठंगिरीशोऽ
वतुनीलकंठः पाणिद्वयंपातुपिनाकपाणिः ॥दोर्मूलमव्याममधर्मबा
हुर्वक्षस्थलंदक्षमखांतकोव्यात् ॥१६॥ममोदरंपातुगिरीद्रधन्वा म
ध्यंममाव्यान्मदनांतकारी ॥ हेरंबतातोममपातुनाभिंपायात्कटिं
धूर्जटिरीश्वरोमे ॥ १७ ॥ ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयंमेजगदी
श्वरोव्यात् ॥ जंघायुगंपुंगवकेतुरव्यात्पादौममाव्यात्करवंद्यपादः
॥१८॥ महेश्वरःपातुदिनाद्ययामेममाध्ययामेवतुवामदेवः ॥ त्र्यं

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

शिव॰ ॥३॥

बकः पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे ॥१९॥
पायान्निषादो ज्ञशिरोरुवेरोमांगं गाधरोरक्षतुमांनिशी
थे ॥ गौरीपतिः पातु शोनिवसानेमृत्युंजयोरक्षतुसार्व
कालं ॥२०॥ अंतश्छितंरक्षतुशंकरोमांस्वाणुः सदापा
तुबहिःस्छितंमां ॥ तदंतरेपातुपतिः पशूनांसदाशिवो
रक्षतुमासमंतात् ॥२१॥ तिष्ठंतमव्याद्भुवनैकनाथः पाया
द्व्रजंतंप्रमथाधिनाथः ॥ वेदांतवेद्योवतुमांनिषण्णंमामव्य
यःपातुशिवःशयानं ॥२२॥ मार्गेषुमांरक्षतुनीलकंठः ॥
शैलादिदुर्गेषुपुरत्रयारिः ॥ अरण्यवासादिमहाप्रवासे

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

पाया मृगव्याधउदारशक्तिः॥ २३॥ कल्पांतकाटोपपटुः
प्रकोपस्फुटाट्टहासोच्चलितांडकोशः॥ घोरारिसेनार्ण
वदुर्निवारमहाभयाद्रक्षतुवीरभद्रः॥ २४॥ पत्त्यश्वमातं
गघटावरूथसहस्रलक्षायुतकोटिभीषणं॥ अक्षो
हिणीनांशतमातताय्यनीकिनीं छिंद्यान्मृडोघोरकुठार
धारया॥ २५॥ निहंतुदस्यून्प्रलयानलार्चिर्ज्वलत्त्रिशूलं
त्रिपुरांतकस्य॥ शार्दूलसिंहर्क्षवृकादिहिंस्रांसंत्रासयत्वी
शधनुःपिनाकः॥ २६॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्य
दुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि॥ दुस्सातितापविषभी

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



तिमस्तग्रहार्तिव्याधिभ्यो नाशयतुमेजगतामधीशः ॥ २७ ॥

॥ ४ ॥ ॥ ॐ नमोभगवतेसदाशिवायसकलतत्वात्मकायस
कलतत्वविदूरायसकललोकैककर्त्रेसकललोकैक
भर्त्रेसकललोकैकहर्त्रेसकललोकैकगुरवेसकललो
कैकसाक्षिणेसकलनिगमगुह्यायसकलवरप्रदाय
सकलदुरितार्तिभंजनायसकलजगदभयंकरायस
कललोकैकशंकरायशशांकशेखरायशाश्वतनि
जावासायनिर्गुणायनिराभासायनिरामयायनिरा ॥
तंकायनिष्प्रपंचायनिष्कलंकायनिर्द्वंद्वायनिःसंगाय ॥ ४ ॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

निर्गमायनिर्ममायनिर्मलायनिरुपमविभवायनिरा.
धारायनित्यशुद्धबुद्धपरिपूर्णसच्चिदानंदाद्वयपरमशा
तप्रकाशतेजोमयायतेजोरूपायजयजयमहारुद्र
हारौद्रभद्रावतारमहाभैरवकालभैरवकपालभैरवक
ल्पांतभैरवकपालमालाधरखड्गांगखट्वांगचर्मपाशां
कुशाडमरुशूलचापबाणगदाशक्तिभिंडिमालातोमर
मुसलमुद्गलप्राशपट्टीशपरशुपरिघशुंडीशतघ्नी
चक्रायुधभीषणकरसहस्रमुखदंष्ट्राकरालविकटा
ट्टहासविस्फारितब्रह्माडमंडलनागेंद्रकुंडलनागेंद्रहा

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



रनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरां
तकविरूपाक्षविश्वेश्वरविश्वरूपवृषभवाहनविषभू
षणविश्वतोमुखसर्वतोरक्षरक्षमांज्वलज्वलमहा
मृत्युंभयंनाशयनाशयसर्वरोगभयमुत्सादयोत्साद
यविषसर्पभयंशमयशमयचोरान्मारयमारयममश
त्रूनुच्चाटयोच्चाटयत्रिशूलेनविदारयविदायकुठारेण
भिंधिभिंधिखड्गेनछिंधिछिंधिखट्वांगेनविपोथयवि
पोथयमुसलेननिष्पेषयनिष्पेषयबाणैःसंताडयसंता
डयरक्षांसिभीषयभीषयभूतानिविद्रावयविद्रावय

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

कूश्मांडवेताल्मारीगणब्रह्मराक्षसान्संत्रायसंत्रास स
यममाभयंकुरुकुरुवित्रस्तंमामाश्वासयाश्वासयनर
कभयान्मामुद्धरोद्धरसंजीवयसंजीवयक्षुत्तृड्भ्यांमा
माप्याययाप्याययदुःखातुरमामानंदयआनंदयशिव
कवचेनमामाछादयाछादयत्र्यंबकनमस्तेनमस्ते ॥
॥ऋषभउवाच॥ इत्येतत्कवचंशैवंवरदंव्याहृतंमया
सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनां॥२८॥ यः सदा
धारयेन्मर्त्यःशैवंकवचमुत्तमं॥ नतस्यजायतेक्वापि
भयंशंभोरनुग्रहात्॥ २९॥ क्षीणायुःग्रासमृत्युर्वीम

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



हारोगहतोपिवा॥ सद्यः सुखमवाप्नोतिदीर्घमायुः श्च
विंदति॥ ३०॥ सर्वदारिद्र्यशमनंसौमंगल्यविवर्धनं॥ यो
धीतेकवचंशैवंसदेवैरपिपूज्यते॥ ३१॥ महापातकसंघा
तैर्मुच्यतेचोपपातकैः॥ देहांतेमुक्तिमाप्नोतिशिववर्मानुभा
वितः॥ ३२॥ त्वमपिश्रद्धया वत्सशैवंकवचमुत्तमं॥ धारय स्व
मया दत्तंसद्यःश्रेयोह्यवाप्स्यसि॥ ३३॥ सूतउवाच॥ इत्यु क्त्वा
ऋषभोयोगीतस्मैपार्थिवसूनवे॥ ददौशंखंमहानादंखड्ग
चारिनिसूदनं॥ ३४॥ पुनश्चभस्मसंमंत्र्यतदंगपरितोस्पृशो
तू॥ गजानांषट्सहस्रस्यबलमस्यबलंददौ॥ ३५॥ भस्मस्प्र

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust

भास्मधारणसंप्राप्तबलैश्वर्यधृतिस्मृतिः॥ सराजपुत्रः सुसु
मेशारदकेरवप्रियः॥ ३६॥ तमाहूयाजलीभूयः सयोगीनृप
नंदन एषखड्गोमयादत्तस्तपोमंत्रानुभाविनः॥ ३७॥ शात
धारमिमंखड्गंयस्मैदर्शयसिस्फुटं॥ ससद्योम्रियतेशत्रुः सा
क्षान्मृत्योरपिस्वयं॥ ३८॥ अस्यशंखस्यनिर्ह्रादंयेशृण्व
तिसमाहिताः॥ तेमूर्छिताःपतिष्यंतिन्यस्तशस्त्राविचेत
नाः॥ ३९॥ खड्गशंखाविमौदिव्यौपरसैन्यविनाशनौ
आत्मसैन्यस्वपक्षाणांरक्षोर्यतेजोविवर्धनं॥ ४०॥ एतयो
श्चप्रभावेनरक्षोवेनकवचेनतु॥ द्विषट्सहस्रनागानां
बलेनमहतापिच॥ ४१॥ भस्मधारणसामर्थ्याच्छत्रु

Kashi Maharani Collection, Ramnagar Fort, Varanasi

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust



सेन्यंविजेष्यसि॥ प्राप्यसिंहासनंपित्र्यंगोप्तासिपृथिवी
मिमां॥ ४२॥ इतिभद्रायुवंसम्यक्गनुशास्यसमा॰तृकं
ताभ्यांसंपूजितःसोपियोगीश्वर्यगतीर्ययौ॥ ४३॥ इति
श्रीब्रह्मोत्तरखंडेशिवरहस्यवक्यनंनामद्वादशोध्यायः॥
श्रीसांबसदाशिवार्पणमस्तु॥ ॥ ५॥ ५॥
शके १७२२ रौद्रनामसंवत्सरेआषाढशुक्लत्रयोदश्यां
इदंपुस्तकंगोमाधिभट्टशिवकेरणवेराजक्षेत्रेलिखितं॥

Kashi Maharani Collection, Ramnagar Fort, Varanasi